# श्री वासुदेवानंद सरस्वतींची आरती

जय जय श्रीमद्गुरुवर स्वामिन् परमात्मन् हंसा ।।
वासुदेवानंद सरस्वती आरती तद हंसा ।। धृ. ।।
सोऽहं हंसः पक्ष्याभ्यां संचरसि ह्याकाशे ।।
वसस्ते खलु लोके सत्ये क्रीडा तव मनसे ।। जय जय ।। १ ।।
मुक्ताहारो ब्रह्म्वाह्को वैराडरूपधर ।।

भक्तराज हृद्ध्वांत तमोहृत स्वीकुरु मां च हर ।। जय जय ।। २ ।।
पक्षस्यैके वातेनैते भीता: काकाधा: ।।
पलायितास्ते द्रुतं प्रभावात् भवंति चादृश्या: ।। जय जय ।। ३ ।।
एवं सति खलु बालस्तेहं ग्रसित: कामाधैः ।
मातस्त्वरया चोध्दर कृपया प्रेषितशांत्याधैः ।। जय जय ।। ४ ।।
दासस्ते नरसिंहसरस्वती याचे श्रीचरणम् ।।
भक्तिश्रद्धे वासस्ते हृदि सततं मे शरणम् ।। जय जय ।। ५ ।।

eAstroHelp